CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education Advanced Level**

# SANSKRIT 9606/1

PAPER 1. Prescribed Texts

**MAY/ JUNE 2013**

Additional materials:
Answer paper

**TIME** $2\frac{1}{2}$ hours

## INSTRUCTIONS TO CANDIDATES

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

## INFORMATION FOR CANDIDATES

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

This question paper consists of 9 printed pages.


' UCLES 2013

**1** *Buddhacarita of Aśvaghoṣa*

**(i)** क एष भोः सूत नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः ।
भ्रूसंवृताक्षः शिथिलानताङ्गः किं विक्रियैषा प्रकृतिर्यदृच्छा ॥

इत्येवमुक्तः स रथप्रणेता निवेदयामास नृपात्मजाय ।
संरक्ष्यमप्यर्थमदोषदर्शी तैरेव देवैः कृतबुद्धिमोहः ॥

रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम् ।
नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः ॥

पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिसृप्तमुर्व्याम् ।
क्रमेण भूत्वा च युवा वपुष्मान् क्रमेण तेनैव जरामुपेतः ॥

इत्येवमुक्ते चलितः स किंचिद्राजात्मजः सूतमिदं बभाषे ।
किमेष दोषो भविता ममापीत्यस्मै ततः सारथिरभ्युवाच ॥

आयुष्मतोऽप्येष वयःप्रकर्षो निःसंशयं कालवशेन भावी ।
एवं जरां रूपविनाशयित्रीं जानाति चैवेच्छति चैव लोकः ॥

ततः स पूर्वाशयशुद्धबुद्धिर्विस्तीर्णकल्पाचितपुण्यकर्मा ।
श्रुत्वा जरां संविविजे महात्मा महाशनेर्घोषमिवान्तिके गौः ॥

*Book 3, vv 28 to 34*

**(a)** Translate lines 1 to 4, *'ka eṣa . . . kṛtabuddhimohaḥ'.* [6]

**(b)** Translate and explain:
- **(i)** *'rājātmajaḥ'* (line 9)
- **(ii)** *'kālavaśena'* (line 11)
- **(iii)** *'vistīrṇakalpācitapuṇyakarmā'* (line 13) [4]

**(c)** Recount briefly the realization the young prince is brought to in this passage, and the two similarly shocking realizations he came to on similar journeys. [2]

**(ii)** उपवासविधीन्नैकान् कुर्वन्नरदुराचरान् ।
वर्षाणि षट् शमप्रेप्सुरकरोत्कार्श्यमात्मनः ॥

अन्नकालेषु चैकैकैः स कोलतिलतण्डुलैः ।
अपारपारसंसारपारं प्रेप्सुरपारयत् ॥

देहादपचयस्तेन तपसा तस्य यः कृतः ।
स एवोपचयो भूयस्तेजसास्य कृतोऽभवत् ॥

कृशोऽप्यकृशकीर्तिश्रीर्ह्लादं चक्रेऽन्यचक्षुषाम् ।
कुमुदानामिव शरच्छुक्लपक्षादिचन्द्रमाः ॥

त्वगस्थिशेषो निःशेषैर्मेदःपिशितशोणितैः ।
क्षीणोऽप्यक्षीणगाम्भीर्यः समुद्र इव स व्यभात् ॥

अथ कष्टतपःस्पष्टव्यर्थक्लिष्टतनुर्मुनिः ।
भवभीरुरिमां चक्रे बुद्धिं बुद्धत्वकाङ्क्षया ॥

नायं धर्मो विरागाय न बोधाय न मुक्तये ।
जम्बुमूले मया प्राप्तो यस्तदा स विधिर्ध्रुवः ॥

*Book 12, vv 95 to 101*

**(a)** Translate lines 1 and 2, *'upavāsavidhīn .... kārśyam ātmanaḥ'.* [3]

**(b)** Translate and explain:
**(i)** *'tvagasthiśeṣaḥ'* (line 9)
**(ii)** *'jambumūle'* (line 14) [2]

**(c)** What is the realization that Buddha came to at the end of this passage, how did it alter his approach and what major plank of his teaching did it lead to? [3]

[Total: 12 + 8 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)** एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गणौ॥

इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्।
संनियम्य तु तान्येव ततः सिद्धिं नियच्छति॥

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥

*Book 2, vv 92 to 94 and Book 3, vv 68 to 70*

**(a)** Translate lines 1 and 2, *'ekādaśaṃ . . . gaṇau'.* [3]

**(b)** Translate and explain:
**(i)** *'kṛṣṇavartmā'* (line 6)
**(ii)** *'pratyaham'* (line 10)
**(iii)** *'atithipūjanam'* (line 12) [3]

**(c)** Summarise the five sacrifices detailed in lines 11 and 12. [3]

**(ii)**

क्षान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्यकारिणः ।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ॥

मृत्तोयैः शुद्ध्यते शोध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥

अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥

तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥

*Book 5, vv 107 to 109 and Book 7, vv 14 to 16*

**(a)** Translate lines 1 to 4, *'kṣāntyā . . . dvijottamaḥ'.* [6]

**(b)** Translate and explain:
- **(i)** *'vidyātapobhyām'* (line 6)
- **(ii)** *'deśakālau'* (line 11)
- **(iii)** *'yathārhataḥ'* (line 12) [3]

**(c)** In lines 7 and 8 the law is described. List four attributes of the law drawn from these two lines. [2]

[Total: 9 + 11 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

**(i)**
वायुर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च॥
सूर्यो यथा सर्वलोकस्य चक्षुर्
न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः॥
एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरास्
तेषां सुखं शाश्वतं नेतरेषाम्॥

*Kaṭha Up. 2:2: 10 to 12*

**(a)** Translate lines 5 to 8, *'sūryo yathā . . . bāhyaḥ'.* [3]

**(b)** Translate and explain:
**(i)** *'sarvabhūtāntarātmā'* (line 3)
**(ii)** *'ātmastham'* (line 11) [2]

**(c)** Explain the simile spelt out in lines 1 to 4. [2]

**(d)** Compare and contrast the aim stated in the final verse above (lines 9 to 12) with the aim you have found stated in Buddhist literature such as the Buddhacarita. [3]

**(ii)** एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः।
सोऽहं भगवते सहस्रं ददामि। अथ ऊर्ध्वं विमोक्षायैव
ब्रूहीति॥

मनसैवानुद्रष्टव्यम् नेह नानास्ति किंचन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्।
विरजः पर आकाशादज आत्मा महान्ध्रुवः॥

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म।
अभयं वै ब्रह्म। अभयं हि वै ब्रह्म भवति य एवं वेद॥

*Bṛhadāraṇyaka Up. 4:3: 33 and 4:4 19, 20, 25*

**(a)** Translate lines 1 to 5, *'eṣa brahmalokaḥ . . . nāneva paśyati'.* [6]

**(b)** Translate and explain *'apramayam'* (line 6). [1]

**(c)** Taking the two passages in question 3 to be broadly representative of Upaniṣad literature, compare and contrast this with the style and content of the Buddhacarita and Manu's Dharmaśāstra. [3]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥

बलं बलवतामस्मि कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥

*Chap. 7, vv 8 to 11; Chap. 16, vv 4 and 5*

**(a)** Translate and explain:
  **(i)** *'śaśisūryayoḥ'* (line 1)
  **(ii)** *'kāmarāgavivarjitam'* (line 7)
  **(iii)** *'bharatarṣabha'* (line 8) [3]

**(b)** Translate lines 9 to 12, *'dambho . . . pāṇḍava'.* [5]

**(c)** The first four verses above enumerate Kṛṣṇa's identity as the finest aspect in all created things. He is also said to be one of the incarnations of Viṣṇu. What can you say about the doctrine of incarnation and which other incarnations have been listed elsewhere? [2]

**(ii)** चंचलमिति। चंचलं हि मनः। कृष्णेति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषाकर्षणात्कृष्णः। हि यस्मान्मनः चंचलं न केवलमत्यर्थं चंचलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिंद्रियाणि च विक्षिपत्सत् परवशीकरोति। किंच बलवत् प्रबलं न केनचिन्नियन्तुं शक्यं दुर्निवारत्वात्। किंच दृढं तंतुनागवदच्छेद्यम्। तस्यैवंभूतस्य मनसोऽहं निग्रहं निरोधं मन्ये वायोरिव। यथा वायोर्दुष्करो निग्रहस्ततोऽपि मनसो दुष्करं मन्ये इत्यभिप्रायः॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā, Chap. 6, v 34*

**(a)** Translate lines 1 to 4, *'kṛṣṇeti . . . paravaśīkaroti'.* [6]

**(b)** Translate and explain:
**(i)** *'durnivāratvāt'* (line 5)
**(ii)** *'tantunāgavat'* (line 6) [2]

**(c)** In this and other commentaries, Śaṅkara uses a variety of techniques to explain the Bhagavad Gītā verses. Using your knowledge of his methods from this and other verses, name four particular ways he uses to elucidate the texts he comments on. [2]

[Total: 10 x 2 = 20 marks]

END